# Taittiriya Samhita 1

# तैत्तिरीयसंहिता १ कृष्णयजुर्वेदीय

## Document Information

Text title : taittiriiya samhitaa 1

File name : taitsamhita1.itx

Category : veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer rajsand at yahoo.com

Proofread by : VENKATAVARAHAN <ternandanan at satyam.net.in and Rajagopal Iyer rajsand at yahoo.com

Latest update : August 3, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# तैत्तिरीयसंहिता १ कृष्णयजुर्वेदीय

॥ कृष्णयजुर्वेदीय तैत्तिरीय संहिता ॥

॥ प्रथमं काण्डम्। ॥

इषेत्वोर्जेत्वावायवस्स्थोपायवस्स्थदेवोवस्सविता-
प्रार्पयतुश्रेष्ठतमायकर्मण
आप्यायध्वमघ्नियादेवभागमूर्जस्वतीःपयस्वतीःप्रजावतीरनमीवा
अयक्ष्मामावस्तेन
ईशतमाऽघशꣳसोरुद्रस्यहेतिःपरिवोवृणक्तु-
ध्रुवास्मिन्गोपतौस्यातबह्वीर्यजमानस्य
पशून्पाहि ॥ १ ॥ ॥ १.१.१ ॥

यज्ञस्यघोषदसिप्रत्युष्टꣳ रक्षःप्रत्युष्टाअरातयःप्रेयमगाद्धिषणा
बर्हिरच्छमनुनाकृतास्वधयावितष्टात
आवहन्तिकवयःपुरस्ताद्देवेभ्योजुष्टमिह
बर्हिरासदेदेवानाम्परिषूतमसिवर्षवृद्धमसि-
देवबर्हिर्मात्वान्वङ्मातिर्यक्पर्वते
राध्यासमाच्छेत्तातेमारिषन्देवबर्हिश्शतवल्शंविरोहसहस्रवल्शाः॥
२॥ विवयꣳ
रुहेमपृथिव्यास्सम्पृचःपाहिसुसम्भृतात्वासम्भराम्यदित्यैरास्नाऽसीन्द्राण्यै
सन्नहनम्पूषातेग्रन्थिङ्ग्रथ्नातुसतेमाऽऽस्थादिन्द्रस्यत्वाबाहुभ्यामुद्यच्छे
बृहस्पतेर्मूर्ध्नाहराम्युर्वन्तरिक्षमन्विहिदेवङ्गममसि
॥ ३ ॥ ॥ १.१.२ ॥

शुन्धध्वंदैव्यायकर्मणेदेवयज्यायैमातरिश्वनोघर्मोऽसिद्यौरसिपृथिव्यसि

विश्वधाया
असिपरमेणधाम्नादृꣳहस्वमाह्वार्वसूनाम्पवित्रमसिशतधारं
वसूनाम्पवित्रमसिसहस्रधारꣳहुतस्तोकोहुतोद्रप्सोऽग्नयेबृहतेनाकायस्वाहा
द्यावापृथिवीभ्याꣳसाविश्वायुस्साविश्वव्यचास्साविश्वकर्मासम्पृच्यध्वमृतावरी
रूर्मिणीर्मधुमत्तमामन्द्राधनस्यसातयेसोमेनत्वाऽऽतनच्मीन्द्रायदधि
विष्णोहव्यꣳरक्षस्व ॥ ४॥ ॥ १.१.३ ॥

कर्मणेवांदेवेभ्यश्शकेयंवेषायत्वाप्रत्युष्टꣳरक्षःप्रत्युष्टाअरातयोधूर
सिधूर्वधूर्वन्तंधूर्वन्योस्मान्धूर्वतितंधूर्वयंवयंधूर्वामस्त्वंदेवानामसि
सस्नितमम्पप्रितमञ्जुष्टतमंवह्नितमन्देवहूतममह्रुतमसिहविर्धानंदृꣳह
स्व
माह्वार्मित्रस्यत्वाचक्षुषाप्रेक्षेमाभेर्मासंविक्थामात्वाहिꣳसिषमुरुवा
तायदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्यामग्नयेजुष्टं
निर्वपाम्यग्नीषोमाभ्यामिदंदेवानामिदमुनस्सहस्फात्यैत्वानाऽरात्यैसुवरभि
विख्येषंवैश्वानरंज्योतिर्दृꣳहन्तांदुर्याद्यावापृथिव्योरुर्वन्तरिक्षमन्विह्यदित्यास्
त्वोपस्थेसादयाम्यग्नेहव्यꣳरक्षस्व ॥ १.१.४ ॥

देवोवःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोस्सूर्यस्यरश्मिभिरापोदेवीरग्रेपुवोऽग्रे
गुवोऽग्रइमंयज्ञन्नयताग्रेयज्ञपतिंधत्तयुष्मानिन्द्रोऽवृणीतवृत्रतूर्ये
यूयमिन्द्रमवृणीध्वंवृत्रतूर्येप्रोक्षितास्थाऽग्नयेवोजुष्टंप्रोक्षाम्यग्नीषोमा
भ्याꣳशुन्धध्वंदैव्यायकर्मणेदेवयज्यायाअवधूतꣳरक्षोऽवधूता
अरातयोदित्यास्त्वगसिप्रतित्वापृथिवीवेत्त्वधिषवणमसिवानस्पत्यम्प्रति
त्वाऽदित्यास्त्वग्वेत्त्वग्नेस्तनूरसिवाचोविसर्जनंदेववीतयेत्वागृह्णाम्यद्रिरसिवानस्पत्यस्स
इदंदेवेभ्योहव्यꣳसुशमिशमिष्वेषमावदोर्जमावदद्युमद्वदतवयꣳ
सङ्घातंजेष्मवर्षवृद्धमसिप्रतित्वावर्षवृद्धंवेत्तुपरापूतꣳरक्षः
परापूताअरातयोरक्षसाम्भागोऽसिवायुर्वोविविनक्तुदेवोवस्सविताहिरण्यपाणिःप्रति
गृह्णातु ॥ १.१.५ ॥

अवधूतꣳरक्षोऽवधूताअरातयोऽदित्यास्त्वगसिप्रतित्वापृथिवीवेत्तुदिवस्कम्भनिरसि
प्रतित्वाऽदित्यास्त्वग्वेत्तुधिषणाऽसिपर्वत्याप्रतित्वादिवस्स्कम्भनिर्वेत्तु

धिषणाऽसिपार्वतेयीप्रतित्वापर्वतिर्वेत्तुदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यामधिवपामिधान्यमसिधिनुहिदेवान्प्राणायत्वाऽपानयत्वाव्यानाय
त्वादीर्घामनुप्रसितिमायुषेधांदेवोवस्सविताहिरण्यपाणिःप्रतिगृह्णातु
॥ १.१.६ ॥

धृष्टिरसिब्रह्मयच्छापाग्नेऽग्निमामादंजहिनिष्क्रव्यादꣳ सेधाऽऽदेवयजम्
वहनिर्दग्ध ꣳ रक्षोनिर्दग्धाअरातयोध्रुवमसिपृथिवींदृꣳ हाऽऽयुर्दृꣳ ह
प्रजांदृꣳहसजातानस्मैयजमानायपर्यूहधर्त्रमस्यन्तरिक्षंदृꣳ हप्राणं
दृꣳहापानंदृꣳहसजातानस्मैयजमानायपर्यूहधरुणमसिदिवन्दृꣳ ह
चक्षुर्दृꣳ हश्रोत्रंदृꣳ हसजातानस्मैयजमानायपर्यूहधर्मासिदिशोदृꣳ ह
योनिंदृꣳ हप्रजांदृꣳहसजातानस्मैयजमानायपर्यूहचितस्स्थप्रजामस्मै
रयिमस्मैसजातानस्मैयजमानायपर्यूहभृगूणामङ्गिरसांतपसातप्यध्वंयानि
घर्मेकपालान्युपचिन्वन्तिवेधसः।
पूष्णस्तान्यपिव्रतैन्द्रवायूविमुञ्चताम् ॥ १.१.७ ॥

संवपामिसमापोअद्भिरग्मतसमोषधयोरसेनसꣳ रेवतीर्जगतीभिर्मधुमतीर्
मधुमतीभिस्सृज्यध्वमद्भ्यःपरिप्रजातास्स्थसमद्भिःपृच्यध्वञ्जनयत्यैत्वासंयौ
म्यग्नयेत्वाग्नीषोमाभ्याम्मखस्यशिरोसिघर्मोऽसिविश्वायुरुरुप्रथस्वोरुतेयज्ञपतिः
प्रथतान्त्वचंगृह्णीष्वान्तरित ꣳ रक्षोऽन्तरिताअरातयोदेवस्त्वासविताश्रपयतु
वर्षिष्ठेअधिनाकेऽग्निस्तेतनुवम्माऽतिधागग्नेहव्यꣳ रक्षस्वसम्ब्रह्मणा
पृच्यस्वैकतायस्वाहाद्वितायस्वाहात्रितायस्वाहा ॥ १.१.८ ॥

आददइन्द्रस्यबाहुरसिदक्षिणस्सहस्रभृष्टिश्शततेजावायुरसितिग्मतेजाःपृथिवि
देवयजन्योषध्यास्तेमूलम्माहिꣳसिषमपहतोऽररुःपृथिव्यैव्रजंगच्छगोस्थानं
वर्षतुतेद्यौर्बधानदेवसवितःपरमस्याम्परावतिशतेनपाशैर्योऽस्मान्द्वेष्टि
यंचवयंद्विष्मस्तमतोमामौगपहतोऽररुःपृथिव्यैदेवयजन्यैव्रजंगच्छगोस्थानम्वर्षतुतेद्यौर्बधानदेव-

सवितःपरमस्याम्परावतिशतेनपाशैर्योऽस्मान्द्वेष्टि
यंचवयंद्विष्मस्तमतोमामौगपहतोऽररुःपृथिव्या
अदेवयजनोव्रजंगच्छ

गोस्थानंवर्षतुतेद्यओर्बधानदेवसवितःपरमस्याम्परावतिशतेनपाशैर्योऽस्मान्
द्वेष्टियंचवयंद्विष्मस्तमतोमामौगररुस्तेदिवम्मास्कान्
वसवस्त्वापरिगृह्णन्तु
गायत्रेणछन्दसारुद्रस्त्वापरिगृह्णन्तुत्रैष्टुभेनछन्दसाऽऽदित्यास्त्वापरिगृह्णन्तु
जागतेनछन्दसादेवस्यसवितुस्सवेकर्मकृण्वन्तिवेधसऋतमस्यृतसदनमस्यृतश्री
रसिधा असिस्वधा
अस्युर्वीचासिवस्वीचासिपुराक्रूरस्यविसृपोविरफ्शिन्नुदादायपृथिवीं
जीरदानुर्यामैरयञ्चन्द्रमसिस्वधाभिस्तांधीरासो
अनुदृश्ययजन्ते ॥ १.१.९ ॥

प्रत्युष्टꣳ रक्षःप्रत्युष्टा
अरातयोऽग्नेर्वस्तेजिष्ठेनतेजसानिष्टपामिगोष्ठं
मानिर्मृक्षंवाजिनंत्वासपत्नसाहꣳसं
मार्ज्मिवाचम्प्राणंचक्षुश्श्रोत्रम्प्रजां
योनिम्मानिर्मृक्षंवाजिनींत्वासपत्नसाहीꣳसम्मंज्म्याशासानासौमनसम्प्रजाꣳ
सौभाग्यंतनूम्ऽग्नेरनुव्रताभूत्वासंनह्येसुकृतायकम् ॥
सुप्रजसस्त्वावयꣳसुपत्नीरुपसेदिम। अग्नेसपत्नदम्भंनमदब्धासोअदाभ्यम् ॥
इमंविष्यामिवरुणस्यपाशंयमबध्नीतसवितासुकेतः।
धातुश्चयोनौसुकृतस्यलोकेस्योनम्मेसहपत्याकरोमि ॥
समायुषासम्प्रजयासमग्नेवर्चसापुनः।
सम्पत्नीपत्याऽहंगच्छेसमात्मातनुवामम ॥
महीनाम्पयोऽस्योषधीनाꣳरसस्तस्यतेऽक्षीयमाणस्यनिर्वपामिमहीनां
पयोऽस्योषधीनाꣳरसोऽदब्धेनत्वाचक्षुषाऽवेक्षेसुप्रजास्त्वायतेजोऽसि
तेजोऽनुप्रेह्यग्निस्तेतेजोमाविनैदग्नेर्जिह्वाऽसिसुभूर्देवानांधाम्नेधाम्नेदेवेभ्यो
यजुषेयजुषेभवशुक्रमसिज्योतिरसितेजोऽसिदेवोवस्सवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोः
सूर्यस्यरश्मिभिश्शुक्रंत्वाशुक्रायांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामि
ज्योतिस्त्वाज्योतिष्यर्चिस्त्वाऽर्चिषिधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामि
॥ १.१.१० ॥

कृष्णोऽस्याखरेष्ठोऽग्नयेत्वास्वाहावेदिरसिबर्हिषिएत्वास्वाहाबर्हिरसिस्रुग्भ्यस्त्वा
स्वाहादिवेत्वाऽन्तरिक्षायत्वापृथिव्यैत्वास्वधापितृभ्यऊर्ग्भवबर्हिषद्भ्यऊर्जा
पृथिवींगच्छतविष्णोस्तूपोऽस्यूर्णाम्रदसंत्वास्तृणामिस्वासस्थंदेवेभ्योगन्धर्वोऽसि
विश्वावसुर्विश्वस्मादीषतोयजमानस्यपरिधिरिड
ईडित इन्द्रस्यबाहुरसिदक्षिणो यजमानस्यपरिधिरिड
ईडितोमित्रावरुणौत्वोत्तरतःपरिधत्तांध्रुवेणधर्मणायजमानस्य
परिधिरिड
ईडितस्सूर्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यावीतिहोत्रंत्वाकवेद्युमन्त ँ
समिधीमह्यग्नेबृहन्तमध्वरेविशोयन्त्रेस्थोवसूना ँ रुद्राणामादित्याना ँ सदसि
सीदजुहूरुपभृद्ध्रुवाऽसिघृताचीनाम्नाप्रियेणनाम्नाप्रियेसदसिसीदैता
असदन्
थ्सुकृतस्यलोकेताविष्णोपाहिपाहियज्ञम्पाहियज्ञपतिम्पाहिमांयज्ञनियम्
॥ १.१.११ ॥

भुवनमसिविप्रथस्वाऽग्नेयष्टरिदन्नमः।
जुह्वेह्यग्निस्त्वाह्वयतिदेवयज्याया उपभृदेहि
देवस्त्वासविताह्वयतिदेवयज्यायाअग्नाविष्णूमावामवक्रमिषं
विजिहाथाम्मामासं
ताप्तंलोकम्मेलोककृतौकृणुतंविष्णोस्थानमसीत
इन्द्रोअकृणोद्वीर्याणिसमारभ्योर्ध्वो
अध्वरोदिविस्पृशमह्रुतोयज्ञोयज्ञपतेरिन्द्रावान्थ्स्वाहाबृहद्भाःपाहिमाऽग्ने
दुश्चरितादामासुचरितेभजमखस्यशिरोऽसिसम्ज़्योतिषाज्योतिरङ्क्ताम्
॥ १.१.१२ ॥

वाजस्यमाप्रसवेनोद्ग्राभेणोदग्रभीत् ।
अथासपत्ना ँ इन्द्रोमेनिग्राभेणाधरा ँ अकः ।
उद्ग्राभश्चनिग्राभश्चब्रह्मदेवा
अवीवृधन्। अथासपत्नानिन्द्राग्नीमेविषूचीनान् व्यस्यताम्।
वसुभ्यस्त्वारुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वाऽक्त ँ रिहाणावियन्तुवयः

।
प्रजांयोनिम्मानिर्मृक्षमाप्यायन्तामापओषधयोमरुताम्पृषतयस्थदिवन्गच्छ
ततोनोवृस्टिमेरय। आयुष्पा
अग्नेऽस्यायुर्मेपाहिचक्षुष्पाऽग्नेऽसिचक्षुर्मेपाहिध्रुवाऽ
सियम्परिधिम्पर्यधत्था
अग्नेदेवपणिभिर्वीयमाणः। तंतएतमनुजोषम्भरामि
नेदेषत्वदपचेतयातैयज्ञस्यपाथउपसमित ँ स ँ स्रावभागास्थेषाबृहन्तः
प्रस्तरेष्ठाबर्हिषदश्चदेवा
इमांवाचमभिविश्वेगृणन्त आसद्यास्मिन्बर्हिषि
मादयध्वमग्नेर्वामपन्नगृहस्यसदसिसादयामिसुम्नायसुम्निनीसुम्नेमादध्वंधुरिधुर्योपाथ
मग्नेऽदब्धायोऽशीततनोपाहिमाऽद्यदिवःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्यैपाहि
दुश्चरितादविषंनःपितुंकृणु
सुषदायोनि ँ स्वाहादेवागातुविदोगातुं
वित्त्वागातुमित मनसस्पत
इमंनोदेवदेवेषुयज्ञ ँ स्वाहावाचिस्वाहावातेधाः ॥

१ .१.१३ ॥

उभावामिन्द्राग्नीआहुवध्याउभाराधसस्सहमादयध्यै ।
उभादातारविषा ँ रयीणामुभावाजस्यसातयेहुवेवाम् ॥
अश्रव ँ हिभूरिदावत्तरा वां विजामातुरुतवाघास्यालात् ।
अथासोमस्यप्रयती युवभ्यामिन्द्राग्नीस्तोमंजनयामिनव्यम् ॥
इन्द्राग्नीनवतिम्पुरोदासपत्नीरधूनुतम्। साकमेकेनकर्मणा ॥
शुचिंनुस्तोमंनवजातमद्येन्द्राग्नीवृत्रहणाजुषेथाम् ।
उभाहिवा ँ सुहवा जोहवीमितावाज ँ सद्य उशतेधेष्ठा ॥
वयमुत्वापथस्पतेरथंन वाजसातये । धियेपूषन्नयुज्महि ॥
पथस्पथःपरिपतिं वचस्याकामेन कृतो अभ्यानडर्कम्।
सनोरासच्छुरुधश्चन्द्राग्राधियंधिय ँ सीषधातिप्रपूषा ॥

क्षेत्रस्यपतिनावयॅं हितेनेवजयामसि ।
गामश्वम्पोषयिन्त्वासनोमृडातीदृशे ॥
क्षेत्रस्यपतेमधुमन्तमूर्मिंधेनुरिवपयोअस्मासुधुक्ष्व ।
मधुश्चुतं घृतमिवसुपूतमृतस्यनःपतयोमृडयन्तु ॥
अग्नेनयसुपथाराये अस्मान्विश्वानिदेववयुनानिविद्वान् ।
युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम ॥
आदेवानामपि पन्थामगन्मयच्छक्नवामतदनुप्रवोढुम् ।
अग्निर्विद्वान्त्सयजात्सेदुहोतासो अध्वरान्थ्सऋतून्कल्पयाति ॥
यद्वाहिष्ठतदग्नयेबृहदर्चविभावसो । महिषीवत्वद्रयिस्त्वद्वाजाउदीरते ॥
अग्नेत्वम्पारयानव्योअस्मान्थ्स्वस्तिभिरतिदुर्गाणिविश्वा ।
पूश्चपृथिवीबहुलानउर्वीभवातोकायतनयायशंयोः ॥
त्वमग्नेव्रतपा असिदेव आमर्त्येष्वा। त्वंयज्ञेष्वीड्यः ॥
यद्वोवयम्प्रमिनामव्रतानिविदुषंदेवा अविदुष्टरासः ।
अग्निष्टद्विश्वमापृणातिविद्वान् येभिर्देवाॅं ऋतुभिःकल्पयाति ॥ १. १. १४ ॥

॥ इति प्रथमकाण्डे प्रथमः प्रपाठकः (प्रश्नः)

Encoded with accents by Rajagopal Iyer rajsand@yahoo.com

Proofread by VENKATAVARAHAN ternandanan@satyam.net.in

*Taittiriya Samhita 1*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*